SN – 129

I Semester B.H.M./B.C.A. Examination, Nov./Dec. 2017
(Freshers and Repeaters) (CBCS) (2014-15 and Onwards)
LANGUAGE SANSKRIT – I
Meghadutam, Grammar and Comprehension

Time : 3 Hours Max. Marks : 70

Instructions : *1) Answer in **Sanskrit/Kannada/English**.*

*2) Question Nos. **I, V** and **VI** should be answered in **Sanskrit** only.*

I. समीचीनम् उत्तरं चिनुत। **(10×1=10)**

ಸರಿಯಾದ ಉತ್ತರವನ್ನು ಆರಿಸಿ ಬರೆಯಿರಿ :

Select the correct answer :

1) मेघः कस्य दूतः अस्ति ?

अ) यक्षस्य आ) इन्द्रस्य इ) यमस्य ई) यवनस्य

2) कालिदासः कस्मिन् अलङ्कारप्रयोगे प्रसिद्धः ?

अ) रूपक आ) उत्प्रेक्षा इ) उपमा ई) अतिशयोक्तिः

3) कालिदासस्य जन्मभूमिः का इत्युच्यते ?

अ) उत्कलः आ) वङ्गः इ) कलिङ्गः ई) उज्जयिनी

4) के चेतनाचेतनेषु प्रकृतिकृपणाः ?

अ) सुखर्ता आ) दुःखार्ता इ) कामार्ता ई) चिन्तार्ता

5) यक्षेश्वराणां वसतिः का ?

अ) अलका आ) कुन्तल इ) केरल ई) उत्कलः

6) कुबेरस्य सेवकः कः ?

अ) यक्षः आ) मेघः इ) इन्द्रः ई) वरूणः

P.T.O.

7) प्रद्योतस्य प्रियदुहिता का ?

अ) इन्दुमती आ) वासवदत्ता इ) सीता ई) विनता

8) वत्सराज: क: ?

अ) उदयन: आ) महासेन: इ) सुनयन: ई) मदन:

9) नलगिरि: कस्य नाम ?

अ) अश्वस्य आ) सिंहस्य इ) गजस्य ई) शृगालस्य

10) कस्या: सरित: पय: चेत: इव प्रसन्नम् ?

अ) गङ्गाया: आ) गोदावर्या: इ) गण्डक्या: ई) गम्भीराया:

II. **द्वयो:** प्रश्नयो: उत्तरं लिखत। **(2×10=20)**

ಯಾವುದಾದರೂ **ಎರಡು** ಪ್ರಶ್ನೆಗಳಿಗೆ ಉತ್ತರವನ್ನು ಬರೆಯಿರಿ :

Answer **any two** of the following :

1) कालिदासस्य देशकालकृतिजीवनमधिकृत्य प्रबन्धं लिखत।

ಕಾಳಿದಾಸನ ದೇಶ, ಕಾಲ, ಜೀವನ ಮತ್ತು ಕೃತಿಗಳನ್ನಾಧರಿಸಿ ಪ್ರಬಂಧ ಬರೆಯಿರಿ.

Write an essay on place, life, date and works of Kalidasa.

2) मेघदूते विद्यमानानां पर्वतानां वर्णनं कुरूत।

ಮೇಘದೂತದಲ್ಲಿ ಬರುವ ಪರ್ವತಗಳನ್ನು ವರ್ಣಿಸಿ.

Describe the mountains mentioned in Meghadutam.

3) मेघदूतोक्तरीत्या उज्जयिनी वर्णनं कुरूत।

ಮೇಘದೂತದಲ್ಲಿ ಹೇಳಿರುವಂತೆ ಉಜ್ಜಯಿನೀ ವರ್ಣನೆಯನ್ನು ಮಾಡಿರಿ.

Describe Ujjaini as narrated in Meghadutam.

III. **त्रयाणां** श्लोकानाम् अनुवादं कृत्वा भावं विवृणुत। **(3×4=12)**

ಯಾವುದಾದರೂ **ಮೂರು** ಶ್ಲೋಕಗಳನ್ನು ಅನುವಾದಿಸಿ ವಿವರಿಸಿ :

Translate and explain **any three** of the following :

1) जातं वंशे भुवनविदिते पुष्करावर्तकानां
जानामि त्वां प्रकृतिपुरुषं कामरूपं मघोन:।
तेनार्थित्वं त्वयि विधिवशाद्दूरबन्धुर्गतोऽहं
याञ्चा मोघा वरमधिगुणे ना धमे लब्धकामा:।।

2) मन्दं मन्दं नुदति पवनश्चानुकूलो यथा त्वां
वामश्चायं नदति मधुरं चातकस्ते सगन्धः ।
गर्भाधान क्षणसरिचयान्नूनमाबद्धमालाः
सेविष्यन्ते नयनसुभगं खे भवन्तं बालाकाः ।।

3) नीपं दृष्ट्वा हरितकपिशं केसरैर्धरूढैः
आविर्भूतप्रथममुकुलाः कन्दलीश्चानुकच्छम् ।
जग्ध्वारण्येष्यधिकसुरभिं गन्धमाघ्राय चोर्व्याः
सारङ्गास्ते जललवमुचः सूचयिष्यन्ति मार्गम् ।।

4) वक्रः पन्था यदपि भवतः प्रस्थितस्योत्तराशां
सौधोत्सङ्गप्रणयविमुखो मा स्म भूरूज्जयिन्याः ।
विद्युद्दामस्फुरितचकितैस्तत्र पौराङ्गनानां
लोलापाङ्गैर्यदि न रमसे लोचनैर्वञ्चितोऽसि ।।

5) जालोद्गीर्णैरूपचितवपुः केशसंस्कारधूपैः
बन्धुप्रीत्याभवनशिखिभिर्दत्तनृत्योपहारः ।
हर्म्येष्वस्याः कुसुमसुरभिष्वध्वखेदं नयेथाः
लक्ष्मीं पश्यंल्ललितवनितापादरागाङ्कितेषु ।।

IV. द्वयोः ससन्दर्भं विवृणुत । **(2×4=8)**

ಯಾವುದಾದರೂ **ಎರಡು** ವಾಕ್ಯಗಳನ್ನು ಸಂದರ್ಭಸಹಿತ ವಿವರಿಸಿ :

Annotate **any two** of the following :

1) स्निग्धच्छायातरूषु वसतिं चक्रे रामगिर्याश्रमेषु ।

2) प्रीतः प्रीतिप्रमुखवचनं स्वागतं व्याजहार ।

3) शेषैः पुण्यैः हृतमिव दिवः कान्तिमत्खण्डमेकम् ।

4) इत्यागन्तून्बन्धून्रमयति जनो यत्र बन्धूनभिज्ञः ।।

V. संस्कृतभाषया उत्तराणि लिखत।

ಸಂಸ್ಕೃತದಲ್ಲಿ ಉತ್ತರಿಸಿ:

Answer in **Sanskrit** :

a) **पञ्चानां** लिङ्गविभक्ति वचनानि लिखत। **(5×1=5)**

1) अनिलः 2) महीम्

3) अहम् 4) तोयम्

5) पन्थाः 6) अवन्तीम्

7) तेजः 8) शूलिनः

b) **पञ्चानां** लकारपुरुषवचनानि लिखत। **(5×1=5)**

1) करोतु 2) नुदति

3) अभवम् 4) चक्रे

5) अनुसर 6) जानामि

7) ययाचे 8) अनुसरन्ति।

VI. इमं परिच्छेदं पठित्वा प्रश्नानाम् उत्तराणि लिखत। **(5×2=10)**

पाटलीपुत्रनगरे लीलालयो नाम भूपालः प्रतिवसति स्म। स एकदा आत्मनः प्रतिकृतिं निर्मातुकामः सिन्धुं नाम चतुरं चित्रकारं आहूय आज्ञापयामास ''भद्र, अस्ति मे वाञ्छा मम प्रतिकृतिं निर्मापयितुम्, तदनुष्ठीयतामादेशः'' इति। चित्रकारस्तु चिन्तयामास 'अनुल्लङ्घनीया एव प्रभोरादेशः। किन्तु काणोऽयं एकेन अक्ष्णा इति नास्त्येव अस्य प्रसादसम्भावना' इति। तथापि चतुरः सः अवदत् 'यथाज्ञापयति देवः' इति। व्यतीतेषु कतिपयेषु दिवसेषु सः प्रतिकृतिं दर्शयित्वा अवदत् – ''भोः राजन्, पश्य अस्यां आकृत्यां त्वं मृगयाव्यापृतः'' इति। चित्रकारेण निमीलितं विकृतं तेन न लक्षितम्। तस्मात् प्रसन्नोऽसौ तं चित्रकारं प्रभूतेन धनेन सम्मावयामास।

प्रश्ना :

1) लीलालयो नाम भूपतिः कुत्र आसीत् ?

2) सः चित्रकारं किमिति आज्ञापयामास ?

3) चित्रकारः किमिति चिन्तयामास ?

4) राज्ञा किं न लक्षितम् ?

5) प्रसन्नो राजा चित्रकारं केन सम्भावयामास ?